Shodhshauryam, International Scientific Refereed Research Journal
Available online at : www.shisrrj.com
© 2024 SHISRRJ | Volume 7 | Issue 1
OPEN ACCESS
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# कौमुदीस्थ उत्तरकृदन्तप्रकरेणे प्रसिद्धोदाहरणानां प्रक्रियाविचार:

इप्सिता राउत्
शोधछात्रा ,व्याकरणविभग:, राष्ट्रिय संस्कृत विश्वविद्यालय:, तिरुपति:

**Article Info**

**Publication Issue :**
January-February-2024
Volume 7, Issue 1
**Page Number :** 218-220
**Article History**
Received : 01 Feb 2024
Published : 15 Feb 2024

**सारांश:** - महर्षि पाणिनिना शब्दसाधुत्वबोधनाय अष्टाध्यायी नामक ग्रन्थो उल्लेखिता:। तत्र ग्रन्थे षड्विधानि सूत्राणि प्रोक्तानि। उक्तञ्च – संज्ञा च परिभाषा च विधिनियम एव च । अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ।।
कारिकानुसारं षट्सु षट्विधसूत्रलक्षणेषु संज्ञा एवं विधिसूत्राणां महत् योगदानं वरिवर्तते। एवं विध विधिसूत्राणां पर्यालोचनं संपूर्णं कृदन्तप्रकरणे कृतं वर्तते। अत्रतत्र प्रत्ययविधायकसूत्रेषु नैकानि लोकप्रसिद्धान्युदाहरणानि तेषां प्रक्रिया अध: प्रस्तुयते ।

**मुख्यशब्दा:** – प्रकृति:, प्रत्यय:, प्रक्रिया, उत्तरकृदन्त, उदाहरणानि ।

**द्रुष्टुम्** – दृश् धातो: याति इति क्रियोपपदे **तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्**[1] इति तुमुनि अनुबन्धलोपे **सृजिदृशोर्झल्यमकिति**[2] इति अमि यणि **व्रश्चभ्रजेति**[3] षत्वे ष्टुत्वे मान्तत्वात् **कृन्मेजन्त:**[4] इत्यव्ययत्वे सुब्लुकि द्रष्टुं याति कृष्णकर्मकं यद् भविष्यद् दर्शनं तत्प्रोयजकं गमनमित्यर्थ: ।

**पाक:** – पचनं पाक:' इति विग्रहे पच्धातो: **'भावे'**[5] इति घञि अनुबन्ध- लोपे उपधावृद्धौ **'चजो: कु घिण्ण्यतो:**[6]**'** इति कुत्वे विभक्तिकार्ये च पाक: इति सिद्धम् ।

[1]. पा.सू [1] 3–3–10
[2]. पा.सू 6–1–58
[3]. पा.सू 8–2–36
[4]. पा.सू 1–1–39
[5]. पा.सू 3–3–18
[6]. पा.सू 7–3–52

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

**विस्तार**:- वि पूर्वक - स्तृधातोः शब्दविषयभिन्ने प्रथनेऽर्थे **'प्रथने वावशब्दे'**[7] इति घञि अनुबन्धलोपे **'अचो ञ्णिति'**[8] इति वृद्धौ रपरत्वे विभक्तिकार्ये च विस्तारः इति ।

**परिग्राहः** – पर्युपसर्गाद् ग्रह् धातोर्यशेऽये 'परी यज्ञे' इति परि अनुबन्धलोपे उपधावृद्धौ विभक्तिकार्ये च परिग्राहः इति।

**स्वनः, स्वानः** – स्वन्धातोर्भावे 'स्वनहसोर्वा' इति विभाषया अपि अनुबन्धलोपे विभक्तिकार्ये च स्वनः इति । पक्षे घञि अनुबन्धलोपे उपधावृद्धौ विभक्तिकार्ये च स्वानः इति सिद्धम् ।

**समजः** – समुपसर्गाद् अज्धातोः पशूनां संङ्धेऽर्थे 'समुदोरजः पशुषु[9]' इत्यपि अनुबन्धलोपे विभक्तिकार्ये च समजः इति ।

**जलधि-** जलनि धीयन्तेऽस्मिन्निति विग्रहे कर्मण्युपपदे अधिकरणेऽर्थेकिप्रत्यये अनुवन्धलोपे उपपदसमासे सुब्लुकि विभक्तिकार्ये च जलधिः इति ।

**इच्छा-** इष्धातोर्भवे 'इच्छा' इत्यनेन शप्रत्यये **'इशुगमियमां छः**[10] इति षकारस्य छत्वे **'छे च** [11] इति तुकि स्त्रीत्वाट्टापि विभक्तिकार्ये च इच्छा इति सिद्धम् ।

**कारणा-** व्यन्ताद कृधातोभवे **'ण्यासश्रन्थो युच्**[12] ' इति युचि अनुबन्धलोपे पोरनादेशे स्त्रीत्वाद्ट्टापि विभक्तिकार्ये च कारणा इति ।

**गोचरः** - 'गावश्चरन्त्यस्मिन्निति विग्रहे गो उपपदे चर्धातोः **'गोचरसंचरवह्वजव्यजापण निगमाश्च'**[13] इति निपातनात् धप्रत्यये अनुबन्धलोपे विभक्तिकार्ये च गोचरः इति ।

**अवतार**:- अवतरत्यस्मिन्निति विग्रहे अवोपपदात् तृधातोः **'अवे तृस्त्रोर्घञ्'**[14] इति घञि अनुबन्धलोपे **'अचो ञ्णिति** इति वृद्धौ रपरत्वे विभक्तिकार्ये च अवतारः इति सिद्धम् ।

**रामः** – रमन्ते योगिनोऽस्मिन्नि'ति विग्रहे रम्घातोः **'हलश्च'**[15] इति घञ् प्रत्यये अनुबन्धलोपे उपधावृद्धौ विभक्तिकार्ये च रामः इति ।

**दुःशासनः** – दुःखेन शासितुं योग्यः' इति विग्रहे दुरुपपदात् शास्धातोः **भाषायां- शासियुधिदृशिधूषिमृषिभ्यो युज्वाच्यः**[16] इति युचि अनुबन्धलोपे योरनादेशे उपपदसमासे विभक्तिकार्ये च दुःशासनः इति ।

---

[7]. पा.सू 3-3-33
[8]. पा.सू -7-2-115
[9]. पा.सू -3-3-69
[10]. पा.सू 7-3-77
[11]. पा.सू 6-1-73
[12]. पा.सू 3-3-107
[13]. पा.सू 3-3-119
[14]. पा.सू 3-3-120
[15]. पा.सू 3-3-121
[16]. वार्तिकम्

**दुर्योधनः –** दुःखेन योद्धं शक्यः' इति विग्रहे दुरुपपद-युध्धातोः 'भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः' इति युचि अनुबन्धलोपे योरनादेशे उपपदसमासे विभक्तिकार्ये च दुर्योधनः इति ।

**उषित्वा** - वस्धातोः **'समानकर्तृ कयोः पूर्वकाले'**[17] इति क्त्वाप्रत्यये **'वसतिक्षुधोरिट्**[18]**'** इति इटि सेट्कृत्वात् कित्त्वाभावे प्राप्ते **'मृडमृदगुधकुष क्लिशवदवसः वा**[19] इति क्त्वा इति कित्त्वात् सम्प्रसारणे 'शासिवसिघसीनाश्च' इति षत्वे उषित्वा इति ।

**स्मारं-स्मारं नमति-** स्मृधातोः पौनःपुन्ये द्योत्ये **'आभीक्ष्ण्ये णमुल् च**[20] इति णगुलि अनुबन्धलोपे णित्त्वाद वृद्धो रपरत्वे **'नित्यवीप्सयोः**[21] इति द्वित्वे अव्ययः त्वात् सुब्लुकि स्मारं स्मारमिति । क्त्वापक्ष स्मृत्वा स्मृत्वा इति ।

**नानाकृत्य, नानाकृत्वा, नानाकारम्-** अनाना नाना कृत्वे'ति विग्रहे **'नाधार्थप्रत्यये च्व्यर्थे**[22] इति क्त्वाप्रत्यये **'तृतीयाप्रभृतीन्यन्यतरस्याम्**[23] इति विभाषया समासे क्त्वो ल्यपि तुकि नानाकृत्य इति । समासाभावे नानाकृत्वा इति। णमुल्पक्षे 'अचो ञ्णिति' इति वृद्धौ रपरत्वे नानाकारम् इति सिद्धम् ।

इत्येवं कौमुदीस्थ-उत्तरकृदन्तप्रकरेणे प्रसिद्धोदाहरणानां प्रक्रियाविचारः मया विहितः ।

### सन्दर्भग्रन्थसूची

1.लघुसिद्धान्तकोमुदी- आचार्य रघुनाथ शास्त्री-चौखम्बासुरभारतीप्रकाशन,वारणासी।

2. लघुसिद्धान्तकोमुदी - आचार्य विश्वनाथ मिश्रः - चौखम्बा संस्कृत प्रतिष्ठा, दिल्ली।

3.वैयाकरणसिद्धान्तकौमुदी- श्रीगोपालदत्त पाण्डेयः - चौखम्बा सुरभारती प्रकाशन,

4. वैयाकरणसिद्धान्तकौमुदी- लक्ष्मी शर्मा - चौखम्बा सुरभारती प्रकाशन,वारणासी।

5 . कृदन्तरूपनन्दिनी - जनार्दन हेगडे - संस्कृतभारती अक्षरम् , गिरिनगरम् , वेङ्गलुरु

6. पाणिनीय अष्टाधायी पाठः - स्वामी प्रह्लाद गिरि वेदान्तकेशरी- चौखम्बासुरभारतीप्रकाशन,वारणासी।

[17]. पा.सू 3-4-21

[18]. पा.सू 7-2-52

[19]. पा.सू 1-2-7

[20]. पा.सू 3-4-22

[21]. पा.सू 8-1-4

[22]. पा.सू 3-4-32

[23]. पा.सू 2-2-21